भाषा। कारवी। इत्यमरो मेदिनी च। हिङ्गेर पाता इति भाषा॥

कवलः, पुं, (केन जलेन वलते चलतीति। वल्+अच्।) ग्रासः। इत्यमरः। २। ९। ५४॥
("त्रिकटुकमजमोदा सैन्धवं जीरके द्वे
समधरणधृतानामष्टमो हिङ्गुभागः।
प्रथमकवलभुक्तं सर्पिषा चूर्णमेत-
ज्जनयति जठराग्निं वातरोगांश्च हन्ति"॥
इति वैद्यकचक्रपाणिसंग्रहे अग्निमान्द्याधिकारे।
"अभ्रजन् कवलान्नागा गावोवत्सान् न पाययन्"।
इति हेःरामायणे। २। ४१। ९॥) मत्स्यविशेषः। इति शब्दचन्द्रिका॥ वेले माच इति भाषा॥

कवलितः, त्रि, (कवलं करोति। कवल+णिच्+कर्म्मणि क्तः।) भुक्तः। इति जटाधरः॥ ("शश्वत् कवलितानेकजीवम्"। इति कथासरित्सागरः। २६। १४२॥)

कवसः, पुं, (कौति कवते वा। कुशब्दे+"कृतनीत्यादिना" उणां ४। २। असच्।) कवचः। इत्युणादिकोषः॥

कवाटः, त्रि, (कुशब्दे+भावे अप्। कवं शब्दं अटतीति। कव+अट्+अच्। यद्वा कं वातं वटति वृणोति वारयतीत्यर्थः क+वट्+अण्।) कपाटः। इत्यमरटीकायां वाचस्पतिः। (यथा हेःरामायणे २। ७१। ३७।
"असंवृतकवाटानि श्रीविहीनानि सर्व्वशः"॥)

कवाटवक्रं, क्ली, (कवाटं वक्रं यस्मात्।) वृक्षविशेषः। कवाटवेटु इति भाषा। कवाडवेण्टुया इति केचित्॥ तत्पर्य्यायः। वक्रायम् २ कपोतवक्रम् ३ अश्वजित् ४। इति रत्नमाला॥

कवाटी, स्त्री, (कवाट+अल्पार्थे+ङीप्।) कपाटम्। इत्यमरटीकायां भरतः॥

कवारं, क्ली, (कं जलं आश्रयत्वेन वृणोति। क+वृ+अण्।) पद्मम्। इति त्रिकाण्डशेषः॥

कविः, पुं, (कवते सर्व्वं जानाति सर्व्वं वर्णयति सर्व्वं सर्व्वतो गच्छति वा। कव् इन्। यद्वा कुशब्दे+"अचः इः"। उणां ४। १३८। इति इः।) ब्रह्मा। इति हेमचन्द्रः॥ (अयमादिकविः यथा, "तेने ब्रह्महृदा य आदिकवये" इति भागवते। १। १॥) "वाल्मीकिमुनिः। (एकोऽभून्नलिनात् ततस्तु पुलिनात् वल्मीकतश्चापरस्त एव प्रथिताः कवीन्द्रगुरवस्तेभ्यो नमस्कुर्म्महे"। इत्युद्भटः॥) शुक्राचार्य्यः। (यथा महाभारते १। ६६। ४२।
"ब्रह्मणो हृदयं भित्त्वा निःसृतो भगवान् भृगुः।
भृगोः पुत्त्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः"॥)
सूर्य्यः। काव्यकरः। (यथा रघुः १। ३।
"मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्"॥)
खलीने स्त्री। इति मेदिनी॥ (विष्णुः। यथा महाभारते १३। १४९। २७।
"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः"॥)
कल्किदेवस्य ज्येष्ठभ्राता। यथा,—
"कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः।
तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः"॥
इति कल्किपुराणे २ अध्यायः॥ * अपि च।
"विशाखयूपभूपालः प्रायात् साधुजनप्रियः।
कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च सम्भले॥
कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य महाप्रभम्।
गार्ग्यभर्ग्यविशालैश्च ज्ञातिभिः परिवारितम्।
विशाखयूपो ददृशे चन्द्रं तारागणैरिव"॥
इति तत्रैव ३ अध्यायः॥ * ॥ चौरयोद्धा। यथा।
"वेधस्थाने रणे भङ्गो दुर्गे खड्गैः प्रजायते।
कविप्रवेशनं तत्र योधाघातश्च तत्र वै"॥
इति सर्व्वतोभद्रचक्रे ज्योतिस्तत्त्वम्॥

कविः, त्रि, (कवते श्लोकान् ग्रथते वर्णयति वा। कव्+इन्।) पण्डितः। इत्यमरः। २। ७। ५॥ (यथा मनुः २। १५१।
"अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः"॥)

कविः, स्त्री, (कवति शब्दायते इति। कुशब्दे "अच् इः"। उणां। ४। १३८ इति इः। अश्वमुखे शब्दायमानत्वात्तथात्वम्।) खलीनः। इति मेदिनी। लागाम् इति भाषा॥

कविकं, क्ली, (कवि+स्वार्थे कन्।) खलीनः। इति हलायुधः॥

कविका, स्त्री, (कवि+स्वार्थे कन् टाप् च।) खलीनः। इत्यमरः। २। ८। ४९॥ लागाम इति भाषा। केविकापुष्पम्। इति राजनिर्घण्टः॥ कवची मत्स्यः। इति भावप्रकाशः॥ (अस्या गुणा यथा,—
"कविका मधुरा स्निग्धा कफघ्ना रुचिकारिणी।
किञ्चित् पित्तकरी वात-नाशिनी वह्निवर्द्धिनी"॥
इति च भावप्रकाशस्य पूर्व्वखण्डे मांसवर्गे॥)

कविज्येष्ठः, पुं, (कविषु ज्येष्ठः।) वाल्मीकिमुनिः। इति त्रिकाण्डशेषः॥

कविता, स्त्री, (कवेः रचयितुर्भावः तल्।) कवित्वम्। काव्यम्। यथा,—
"कविता वनिता वापि आयाता सुखदायिनी"। इत्युद्भटः॥

कविवेदी, [न्] त्रि, (कविं कवित्वं वेत्ति। कवि+विद्+णिनिः।) कविः। इति जटाधरः॥

कवियं, क्ली पुं, (कं सुखं अजति। क+अज्+क। अजस्थाने विः।) खलीनः। इति त्रिकाण्डशेषः॥

कविरामायणः, पुं, (कविना कवितया कविषु काव्येषु वा रामः अयनं आश्रयो यस्य।) वाल्मीकिमुनिः। इति शब्दरत्नावली।

कविलासिका, स्त्री, (कं सुखं विलासयति उद्दीपयतीति। क+वि+लस्+णिच्+ण्वुल् टाप् अत इत्वम्।) वीणाविशेषः। इति शब्दरत्नावली॥

कविवाल्मीकिः, पुं, (कविश्चासौ वाल्मीकिश्चेति।) वाल्मीकिमुनिः। इति शब्दरत्नावली॥

कवी, स्त्री, (कवि वा ङीष्।) खलीनः। इति मेदिनी भरतश्च॥ [जटाधरः॥

कवीयं, क्ली, (कवि+स्वार्थे छः।) खलीनः। इति

कवेलं, क्ली, (कं जलं विलति स्तृणाति। क+विल्+अण्।) कुवलयम्। उत्पलम्। इति शब्दचन्द्रिका॥

कवोष्णं, क्ली, (कुत्सितं उष्णं ईषदुष्णं वा।) ईषदुष्णम्। (यथा रघुः १। ६७।
"मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया।
पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते"॥)
तद्वति त्रि। इत्यमरः। १। ४ ३५॥

कव्यं, क्ली, (कूयते पितृभ्यः। पित्रुद्देशेन दीयते यदन्नादिकम्। कु+"अचो यत्" ३। १। ९७। इति यत्।) पित्रन्नम्। पितृसम्प्रदानकान्नम्। इत्यमरः। २। ७। २४॥ (यथा, मनुः १। ९५॥
"यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः।
कव्यानि चैव पितरः किम्भूतमधिकं ततः"॥
कव्यानि तु वेदतत्त्वविदे ब्राह्मणाय दातव्यानि अन्यथा तद्दानं निष्फलं स्यात्यदुक्तं मनौ ३ अध्याये।
"श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्॥
एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्।
पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि॥
दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्।
तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः॥
सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते।
एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः॥
ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च।
न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः॥
यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्।
तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुड़ान्॥
ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथापरे।
तपःस्वाध्यायनिष्ठाश्च कर्म्मनिष्ठास्तथापरे॥
ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः।
हव्यानि तु यथान्यायं सर्व्वेष्वेव चतुर्ष्वपि॥
एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः॥
मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम्।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्॥
येस्तेनपतितक्लीवा ये च नास्तिकवृत्तयः।
तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥
चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा।
विपणेन च जीवन्तो वर्ज्याःस्युर्हव्यकव्ययोः"॥
इत्यादि। विस्तृतिस्तु तत्रैव द्रष्टव्या॥)

कव्यबालः, पुं, (कव्यं बल्यते दीयते अस्मै। कव्य+बल् दाने+सम्प्रदाने घञ्।) पितृगणविशेषः। इति त्रिकाण्डशेषः॥ (यथा, वायुपुराणे।
"कव्यबालोऽनलः सोमः यमश्चैवार्य्यमा तथा।
अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः"॥)

कश, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) कशति। इति दुर्गादासः॥

कशा, स्त्री, (कशति शब्दायते ताड़यति वा। कश्+करणस्य कर्तृविवक्षया कर्त्तरि अच् टाप् च। ताड़यत्यनया वा।) अश्वादेस्ताड़नी। इत्यमरः। २।१०।३१। कोड़ा चाबुक् इति च भाषा॥ ("जघान कशया मोहात् तदा राक्षसवन्मुनिम्"॥ इति महाभारते। १। १७७। १०॥) मांसरोहिणी। इति भावप्रकाशः॥

कशार्हः, त्रि, (कशां अर्हति इति। कशा+अर्ह+